## ॥ शिवस्तुतिः ॥

स्फुटं स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशांकदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्
कदा नु शितिकंठ ते वपुरवेक्षते वीक्षणम् ॥ १ ॥

त्रिलोचन विलोचने लसति ते ललामायिते
स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् ।
स्वभक्तिलतया वशीकृतवती सतीयं सति
स्वभक्तवशगो भवानपि वशी प्रसीद प्रभो  ॥ २ ॥

महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवास
नघोर रिपुघोर तेऽनवम वामदेवांचलिः ।
नमः सपदिजात ते त्वमिति पंचरूपोऽंचितः
प्रपंचय च पंचवृन्मम मनस्तमस्ताड्य ॥ ३ ॥

रसाघनरसानलानिलवियद्विवस्वद्विधु स
प्रयष्टृषु निविष्टमित्यज भजाआमि मूर्त्यष्टकम् ।
प्रशांतमुत भीषणं भुवनमोहनं चेत्यहो
वपूंषि गुणपुंषि तेऽहमहमात्मनोऽहंभिदे ॥ ४ ॥

विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं
पदं निगमवेदिनो जगति वामदेवादयः ।
कथंचिदुपशिक्षिता भगवतैव संविद्रते
वयं तु विरलांतराः कथमुमेश तन्मन्महे ॥ ५ ॥

कठोरतकुठारया ललितशूलया बाहया
रणड्डमरयाअ स्फुरद्धरिणया सखट्वांगया ।
चलाभिरचलाभिरप्यगणिताभिरुन्नृत्यत स
श्चतुर्दशा जगंति ते जय जयेत्ययुर्विस्मयम् ॥ ६ ॥

पुरत्रिपुररंधनं विविधदैत्यविध्वंसनं
पराक्रमपरंपरा अपि परा न ते विस्मयः ।
अमर्षबलहर्षितक्षुभितवृत्तनेत्रत्रयो स
ज्ज्वलज्ज्वलन हेलया शलभितं हि लोकत्रयम् ॥ ७ ॥

सहस्रनयनो गुहः सहसहस्ररश्मिर्विधु स
र्बृहस्पतिरुताप्पतिः ससुरसिद्धविध्याधराः ।
भवत्पदपरायणाः श्रीयमिमामगुः प्रार्थिनां
भवान् सुरतरुर्दृशं दिश शिवां शिवावल्लभ ॥ ८ ॥

तव प्रियतमादतिप्रियतमं सदैवांतरं
पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभम् ।
विभिध्य लघुबुद्धयः स्वपरपक्षलक्षायितं
पठंति हि लुठंति ते शठहृदः शुचा शुंठिताः ॥ ९ ॥

निवासनिलयश्चिता तव शिरस्ततिर्मालिका
कपालमपि ते करे त्वमशिवोऽस्यनंतर्धियाम् ।
तथाऽपि भवतः पदं शिव शिवेत्यदो जल्पतास
मकिंचन न किंचन वृजिनमस्त्यभस्मीभवत् ॥ १० ॥

त्वमेव किल कामधक सकलकाममापूरयन्
अपि त्रिनयनः सदा वहसि चात्रिनेत्रोद्भवम् ।
विषं विषधरान् दधत पिबसि तेन् चानंदवान्
विरुद्धचरितोचिता जगदधीश ते भिक्षुता ॥ ११ ॥

नमः शिव शिवाशिवाशिव शिवार्ध कृंताशिवं
नमो हर हर हराहरहरांतरीं मे दृशम् ।
नमो भव भवाभव प्रभव भूतये संपदां
नमो मृड नमो नमो नम उमेश तुभ्यं नमः ॥ १२ ॥

सतां श्रवणपद्धतिं सरतु सत्रतोक्त्रेत्यसौ
शिवस्य करुणंकुरात् प्रतिकृतात् सदा सोदिता ।
इति प्रथितमानसो व्यधित नाम नारायणः
शिवस्तुतिमिमां शिवां लिकुचसूरिसूनुः सुधीः ॥ १३ ॥

॥ श्री (लिकुच) नारायणपंडिताचार्यविरचिता शिवस्तुतिः ॥

॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु ॥